# Lesson 20: Exercise Pages 262 - 268

1. पूर्वस्मिन् काले सगरः नाम अयोध्यायाः राजा आसीत् ।
   At a previous time, the there was a king of Ayodhyā named Sagara.

2. सः नराधिपः धर्म-[BV6]आत्मा सर्व-[KD]गुण-[TP3]युक्तः अभवत् ।
   The king was of righteous spirit and endowed with all good qualities.

3. तस्य द्वे[1/2] पत्न्यौ[1/2] अभवतां[भू 1P imperf III/2] एका केशिनी नाम विदर्भ-राजस्य सुता द्वितीया सुमतिः नाम अरिष्टनेमेः सुता ।
   He had two wives: one Keśinī by name, the daughter of the king of Vidarbha; the second Sumati by name daughter of Ariṣṭanemi.

4. प्रजा-[BV6]कामः अपि सः राजा अ-[BV6]प्रजः अभवत् ।
   Even being one having progeny as desire, the king was having no son.

5. ततः प्रजार्थं परमं यत्नं कुर्वन्[कृ 8U PrAP 1/1] भार्याभ्यां[3/2] सह सः महा-राजः हिमवन्तं गत्वा दीर्घं तपः आचरत् ।
   Therefore, making supreme effort for progeny, with his wives the king having gone to the Himālaya practiced long austerity.

6. अथ वर्ष-[TP6]शते संपूर्णे सति[अस् 2P PrAP 7/1] तत्र वसन्[वस् 1P PrAP 1/1] महर्षिः भृगुः नाम तेन तपसा आराधितः तस्मै सगराय वरं अयच्छत् ।
   Then when a hundred of years was complete the great sage living there, Bhṛgu by name, honoured by the austerity, gave a boon to that Sagara.

7. सः मुनिः तं इदं वचः अवदत् ।
   The sage told him this statement.

8. सुमहान् अपत्य-[TP6]लाभः तव[6/1] भविष्यति[भू P fut III/1] ।
   "The very great gain of progeny will be yours.

9. अपि च अप्रतिमं यशः अस्मिन् लोके प्राप्स्यसे[प्र-आप् A fut II/1] ।
   Moreover you will gain unmatched fame in this world.

10. एका पत्नी वंशकरं पुत्रं जनिष्यति[जन् P fut III/1] अपरा तु षष्टिं पुत्र-[TP6]सहस्राणि उत्पादयिष्यति[उत्-पद् P c-fut III/1] ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

One wife will bear a son propagating family, and the other will produce sixty thousands of sons."

---

11. इति एताः[2/+] तस्य मुनेः वाचः[2/+] श्रुत्वा एव ते[1/2] भार्ये[1/2] विलम्बेन विना तं अपृच्छतां[प्रच्छ् 1P imperf III/2] का[1/1] आवयोः[6/2] एकं यशस्विनं[2/1] वंशकरं पुत्रं का षष्टिं पुत्र-सहस्राणि जनिष्यति ।

Having just heard these words of the sage, the wives without delay asked him, "Who of us will bear one famed family-propagating son, who sixty thousands of sons?

---

12. तत् ज्ञातुं इच्छावहे[इष् 1U pres I/2] ।

We wish to know this.

---

13. वचः[1/1] ते[6/1] मुने[8/1] सत्यं स्यात्[अस् 2P opt III/1] इति ।

May your statement be true, O sage!"

---

14. तयोः[6/2] तत् वचनं श्रुत्वा सः भृगुः प्रत्यभाषत ।

Having heard the statement of them, that Bhṛgu replied.

---

15. का वां[6/2] कं[2/1] वरं इच्छति ।

"Who of you wishes which boon?

---

16. स्वच्छन्दः अत्र वर्तते ।

It's up to you!

---

17. यत् इच्छेथे[इष् 1U pres II/2] तत् भविष्यति[भू P fut III/1] इति ।

What you desire, that shall be."

---

18. तत् श्रुत्वा केशिन्या ज्येष्ठ-[KD]सगर-[TP6]पत्न्या एकः वंशकरः पुत्रः गृहीतः अन्यया पत्न्या सुमत्या षष्टिः पुत्र-सहस्राणि गृहीतानि ।

Having heard this, by Keśinī the older wife of Sagara the family-propagating son was taken, by the other wife Sumati, the sixty thousands of sons were taken.

---

19. प्रदक्षिणं तं ऋषिं कृत्वा शिरसा च प्रणम्य सः सगरः भार्याभ्यां[3/2] सह स्व-नगरं प्रत्यागच्छत् ।

Having done pradakṣiṇa around the sage, and having bowed with the head, Sagara returned to his city with his wives.

---

20. अथ काले संपूर्णे सति[अस् 2P PrAP 7/1] केशिन्यां एकः पुत्रः असमञ्जः इति ख्यातः अजायत ।

Then when time was complete one son called 'Asamañja' was born in Keśinī.

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

21. सुमत्यां तु गर्भ-[KD]तुम्बः अजायत ।
And in Sumati an embryo like a gourd was born.

---

22. तस्मात् गर्भ-तुम्बात् निर्भिन्नात् षष्टिः पुत्र-सहस्राणि विनिःसृतानि ।
From the gourd-like embryo split apart, sixty thousands of sons went forth.

---

23. कालेन गच्छता[गम् 1P PrAP 3/1] षष्टिः पुत्र-सहस्राणि रूप-[&]यौवनं प्रत्यपद्यत ।
With passing time, the sixty thousands of sons gained beauty and youth.

---

24. एकस्मिन् दिने असमञ्जः दुरात्मा सर्व-[KD]गुण-[TP3]रहितः च सन्[अस् 2P PrAP 1/1] समुत्याः पुत्रान् गृहीत्वा सरय्वाः नद्याः जले प्रक्षिप्य तत्र मज्जतः[मस्ज् 6P PrAP 2/+] तान् पश्यन्[दृश् 1P PrAP 1/+] प्राहसत् ।
On one day Asamañja, having evil spirit and being devoid of all good qualities, having taken the sons of Sumati, having thrown them in the water of the river Sarayū, there seeing them drowning he laughed.

---

25. किन्तु ते सगरस्य सुताः न अम्रियन्त ।
But the sons of Sagara did not die.

---

26. तदनन्तरं यस्मात् अयं असमञ्जः सर्वेषां पौराणां अपि अहिते युक्तः तस्मात् सगरेण पुरात् निर्वासितः ।
Thereupon since this Asamañja was engaged upon the harm of all townsmen also, therefore he was expelled from the city by Sagara.

---

## English to Sanskrit

1. सगरो नामायोध्याया राजा पुरासीत् ।

---

2. स सर्वप्रभुगुणयुक्तो धर्मात्माभवत् ।

---

3. तस्य द्वे पत्न्यौ अभवतां एका केशिनीनामन्य् अपरा सुमतिनाम्नी ।

---

4. सगरः प्रजाकामः किन्त्व् अपुत्रोऽभवत् ।

---

5. तेन कारणेन प्रजार्थं परमं प्रयत्नं कर्तुं भार्याभ्यां सह हिमवन्तं गत्वा तेन नृपेण महत् तप आचरितम् ।

---

6. अन्ततो महर्षिर् भृगुर् नाम वर्षशतं आचरितेन तपसाराधितस् तं सगरं वरं अयच्छत् ।

---

7. तस्य मुनेर् वचनस्यानुसारेण द्वयोर् भार्ययोर् एका यशस्विनं वंशकरं पुत्रं जनयेद् अपरा षष्टिः पुत्रसहस्राणि ।

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

8. यद् इच्छेथे तद् भविष्यतीति मुनिर् अवदत् ।

9. केशिन्यैकः पुत्रो गृहीतः सुमत्या षष्टिः सहस्राणि गृहीतानि ।

10. गच्छता कालेन केशिन्यां असमञ्जो नामैकः पुत्रोऽजायत ।

11. सुमत्यां तु गर्भतुम्बोऽजायत ।

12. गर्भतुम्बान् निर्भिन्नात् षष्टिः पुत्रसहस्राणि विनिःसृतानि ।

13. अथ केशिन्याः पुत्रोऽसमञ्जो नाम दुरात्माभवत् ।

14. सरय्वां हि नद्यां सर्वान् सुमतिपुत्रान् स अक्षिपत् ।

15. किन्त्व् आश्चर्येण सगरपुत्रा नाम्रियन्त ।

16. तस्य हेतोर् असमञ्जः सगरेण पुरान् निर्वासितः ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva